08-06-2021

अनिवार्यपत्रम् । शास्त्री II

व्याकरणदर्शनहेतवे साहित्यम् । श्लोकव्याख्या ।

"तस्मिन्नभिद्योतितबन्धुपद्मे प्रतापसंशोषितशत्रुपङ्के ।
बबन्ध सा नोत्तमसौकुमार्या कुमुद्वती भानुमतीव भावम् ॥"

सन्दर्भः → कालिदासकृते रघुवंशमहाकाव्ये इन्दुमत्याः स्वयंवरवर्णन-प्रसङ्गे एष श्लोकः आयाति ।

प्रसङ्गः → अत्र कविः अवन्तिराजानं प्रति इन्दुमत्याः निःस्पृहभावं सविशेषं प्रतिपादयति ।

अन्वयः → उत्तमसौकुमार्या सा अभिद्योतितबन्धुपद्मे प्रतापसंशोषितशत्रुपङ्के तस्मिन् कुमुद्वती भानुमती इव भावं न बबन्ध ।

शब्दार्थः व्याकरणञ्च → उत्तमसौकुमार्या – अतिकोमला, उत्तमं सौकुमार्यं यस्याः सा । अभिद्योतितबन्धुपद्मे → अभिद्योतितानि बन्धुपद्मानि येन स अभिद्योतितबन्धुपद्मः, तस्मिन् = उल्लसितबन्धुकमले । प्रतापसंशोषितशत्रुपङ्के → प्रतापेन संशोषिता शत्रवः एव पङ्काः येन सह, तस्मिन् = तेजसंशोषितरिपुकर्दमे । तस्मिन् = उज्जयिनीराजनि । कुमुद्वती = नलिनी । भानुमती = अंशुमती । भावं = मनः । इव = यथा । न = नहि । बबन्ध = निबद्धमभवत् ।

तात्पर्यः → सुनन्दया दर्शितः राजानं प्रति इन्दुमती आकर्षिता न भवति यथा नलिनी कमलविकासकं पङ्कशोषकं विलोक्य प्रफुल्लं न भवति ।

विशेषः → अस्मिन् श्लोके शृङ्गाररसः, वैदर्भीरीतिः, माधुर्यगुणः, उपमालङ्कारः, उपजाति छन्दश्च ।

08-06-2021

डॉ० निर्मल कुमार झा, (स० प्राचार्यः)
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।

शास्त्री-I

08-06-2021

## ९ शिशुपालवधे ।

प्र० → महाकवेः माघस्य काव्यनिर्माणवैशिष्ट्यम् वर्णयतु ।

प्र० → 'नवसर्गगते माघे नवशब्दो न विद्यते,' प्रतिपाद्यताम् ।

प्र० → "माघे सन्ति त्रयो गुणाः" भणितेरस्याः सार्थकतां सयुक्तिकं समुपपादयत ।

प्र० → "माघेनैव च माघेन कम्पः कस्य न जायते", अस्याः उक्तेः सार्थकतां सप्रमाणं सम्यक् रूपेण सम्पाद्यताम् ।

( सर्वेषां प्रश्नानाम् एकमेव उत्तरम् । )

उत्तरम् → संस्कृतसाहित्ये भावपक्षेण सह कलापक्षस्य, कवित्वेन सह वैदुष्यस्य, हृदयेन सह मस्तिष्कस्य च सामञ्जस्यं विधाय या कविताधारा भारविणा प्रवाहिता, तस्याः सुषमा श्रीमाघे माघकाव्ये वा दृग्गोचरतामेति । कवेः यशोवल्ली एकेनैव ग्रन्थेनैव अतिप्रसराऽस्ति । माघस्य शब्दशय्या तु प्रसिद्धतमा, नात्र मनागपि शब्दक्रमविपर्ययो विधातुं शक्यते । अतएव आचार्यमर्मज्ञधर्मपालेन उक्तम् →

" माघेन विघ्नितोत्साहा नोत्सहन्ते पदक्रमे ।<br>
स्मरन्तो भारवेरेव कवयः कपयो यथा ॥"

सर्वविधशास्त्रीयवैदुष्यसम्भृतस्य माघस्य शब्दशास्त्रीयज्ञानं सर्वान् कविवरान् अतिशेते । यतः शिशुपालवधे नवसर्गातिक्रान्ते सति नवशब्दो न कोऽपि वर्तते । उक्तञ्च → "नवसर्गगते माघे नवशब्दो न विद्यते ।"

कविकालिदासः उपमाप्रयोगे सिद्धहस्तः । तस्योपमातिसरला किन्तु माघस्योपमा अर्थगाम्भीर्ययुक्ता →

" अनुत्सूत्रपदन्यासा सद्वृत्तिः सन्निबन्धना ।<br>
शब्दविद्येव नो भाति राजनीतिरपस्पशा ॥"

08-06-21

शिशुपालवधस्य प्रारम्भे नारदागमनप्रसङ्गे विद्यमानोपमा जनानां मनांसि मोहयन्ति । आकाशात् अवतरतः नारदस्य हिमालयसादृश्यं पश्यन्तु भवन्तः →

" दधानमम्भोरुहकेसरद्युतीर्जटाः शरच्चन्द्रमरीचिरोचिषम् ।<br>
विपाकपिङ्गास्तुहिनस्थलीरुहो धराधरेन्द्रं व्रततीततीरिव ॥"

शिशुपालवधकाव्यकर्तामाघस्य अपरमभिधानं विद्वद्वर्गे प्रचलितमस्ति – 'घण्टामाघः' । कथं ?

" उदयति विततोर्ध्वरश्मिरज्जावहिमरुचौ हिमधाम्नि याति चास्तम् ।<br>
वहति गिरिरयं विलम्बिघण्टाद्वयपरिवारितवारणेन्द्रलीलाम् ॥"

दण्डिनः हर्षस्य वा पदलालित्यं प्रसिद्धमेव किन्तु माघस्य पदलालित्ये न न्यूनताम् आवहति । माघस्य पदलालित्ये पद्यमिदं सुप्रसिद्धम् →

" मधुरया मधुबोधितमाधवी मधुसमृद्धिसमेधितमेधया ।<br>
मधुकराङ्गनया मुहुरुन्मदध्वनिभृता निभृताक्षरमुज्जगे ॥"

अपि च → "नवपलाशपलाशवनं पुरः स्फुटपरागपरागतपङ्कजम् ।<br>
मृदुलतान्तलतान्तमलोकयत् स सुरभिं सुरभिं सुमनोभरैः ॥"

अत्रापि शब्दशय्यायां भासते भगवती भारती । अतएव सुष्ठु कथितमस्ति – "माघे सन्ति त्रयो गुणाः" अथवा 'माघेनैव च माघेन कम्पः कस्य न जायते ।' महाकविमाघः पदयोजनायां प्रबन्धनिर्वाहे, वस्तुचित्रणे, भावाङ्कने, रसानाम् अलङ्काराणां छन्दसां च प्रयोगे अति कुशलः अतएव मम मते "माघे सन्ति सर्वे गुणाः ।"

[signature] 08-06-2021

डॉ० निर्मल कुमार झा, सह प्रा०<br>
राधा उमाकान्त सं० महा वि० सुरसैना, पूर्णियाँ ।<br>
का० सि० द० सं० विश्ववि० दरभङ्गा ।

उपशास्त्रीकक्षा हेतवे। 08-06-2021

हितोपदेशे अनिवार्य-प्रथमपत्रे श्लोकस्य व्याख्या।

"सिद्धिः साध्ये सतामस्तु प्रसादात्तस्य धूर्जटेः।
जाह्नवीफेनलेखेव यन्मूर्ध्नि शशिनः कला॥"

श्लोकोऽयं नारायणपण्डितेन विरचितस्य 'हितोपदेशात्' ग्रन्थात् उद्धृतोऽस्ति।

ग्रन्थारम्भे कविः मङ्गलमाचरति। मङ्गलाचरणानि त्रिविधानि भवन्ति। वस्तुनिर्देशात्मकम्, आशीर्वादात्मकम् तथा च नमस्कारात्मकम्। "सिद्धिः साध्ये ...... शशिनः कला॥" अयं श्लोकः नमस्कारात्मकम्। अत्र कविः कथयति → यन्मूर्ध्नि- यस्य सिरसि, शशिनः कला- चन्द्रस्य कान्तिः, जाह्नविफेनलेखेव - गंगायामुत्पन्ना फेनसदृशा धवला इव (भाति), तस्य धूर्जटेः- तस्य शिवस्य अथवा तस्मात् शिवात्, प्रसादात्, सताम् - सज्जनानाम्, साध्ये - इष्टकार्ये, सिद्धिः - मोक्षरूपक्रियासिद्धिः अवाप्तिः वा, अस्तु - भवतु।

व्याकरणम् → सिद्धिः - (स्त्री॰) √सिध् + क्तिन्, दिवादिगणीयः।
साध्ये - साध् + णिच् + यत् (तस्मिन्)।
सताम् - √अस् + शतृ, अकारलोपः, षष्ठ्यन्त पदम्।
शशिनः - (शशोऽस्त्यस्य इनि), षष्ठ्यन्त पदम्।
कला - √कल् + कच् + टाप्, प्रथमान्तपदम्।

अस्मिन् श्लोके उपमालङ्कारः, तल्लक्षणं तु - साधर्म्यमुपमाभेदे। उपमानमस्ति जाह्नवीफेनलेखा। उपमेयः - शशिनः कला। उपमावाचीशब्दः इवास्ति। अत्र पूर्णोपमा।

(हस्ताक्षर) 08-06-2021

डॉ॰ निर्मल कुमार झा,
स॰ प्राचार्य।
रा॰ उ॰ सं॰ महावि॰ सुरवसेना, पूर्णियाँ